# Siddhakritam Ganga Stotram

# સિદ્ધકૃતં ગઙ્ગાસ્તોત્રમ્ ૧૧

## Document Information

Text title : Siddhakritam Ganga Stotram

File name : siddhakRRitaMgangAstotram11.itx

Category : devii, devI, nadI, mahAbhArata, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | anushAsanaparva | adhyAya 27/25-98||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# સિદ્ધકૃતં ગઙ્ગાસ્તોત્રમ્ ૧૧

સિદ્ધ ઉવાચ ।
તે દેશાસ્તે જનપદાસ્તેઽઽશ્રમાસ્તે ચ પર્વતાઃ ।
યેષાં ભાગીરથી ગઙ્ગા મધ્યેનૈતિ સરિદ્વરા ॥ ૨૫॥

તપસા બ્રહ્મચર્યેણ યજ્ઞૈસ્ત્યાગેન વા પુનઃ ।
ગતિં તાં ન લભેજ્જન્તુર્ગઙ્ગાં સંસેવ્ય યાં લભેત્ ॥ ૨૬॥

સ્પૃષ્ટાનિ યેષાં ગાઙ્ગેયૈસ્તોયૈર્ગાત્રાણિ દેહિનામ્ ।
ન્યસ્તાનિ ન પુનસ્તેષાં ત્યાગઃ સ્વર્ગાદ્વિધીયતે ॥ ૨૭॥

સર્વાણિ યેષાં ગાઙ્ગેયૈસ્તોયૈઃ કૃત્યાનિ દેહિનામ્ ।
ગાં ત્યક્ત્વા માનવા વિપ્ર દિવિ તિષ્ઠન્તિ તેઽચલાઃ ॥ ૨૮॥

પૂર્વે વયસિ કર્માણિ કૃત્વા પાપાનિ યે નરાઃ ।
પશ્ચાદ્ગઙ્ગાં નિષેવન્તે તેઽપિ યાન્ત્યુત્તમાં ગતિમ્ ॥ ૨૯॥

સ્નાતાનાં શુચિભિસ્તોયૈર્ગાઙ્ગેયૈઃ પ્રયતાત્મનામ્ ।
વ્યુષ્ટિર્ભવતિ યા પુંસાં ન સા ક્રતુશતૈરપિ ॥ ૩૦॥

યાવદસ્થિ મનુષ્યસ્ય ગઙ્ગાતોયેષુ તિષ્ઠતિ ।
તાવદ્વર્ષસહસ્રાણિ સ્વર્ગં પ્રાપ્ય મહીયતે ॥ ૩૧॥

અપહત્ય તમસ્તીવ્રં યથા ભાત્યુદયે રવિઃ ।
તથાપહત્ય પાપ્માનં ભાતિ ગઙ્ગાજલોક્ષિતઃ ॥ ૩૨॥

વિસોમા ઇવ શર્વર્યો વિપુષ્પાસ્તરવો યથા ।
તદ્વદ્દેશા દિશશ્ચૈવ હીના ગઙ્ગાજલૈઃ શુભૈઃ ॥ ૩૩॥

વર્ણાશ્રમા યથા સર્વે સ્વધર્મજ્ઞાનવર્જિતાઃ ।
ક્રતવશ્ચ યથાસોમાસ્તથા ગઙ્ગાં વિના જગત્ ॥ ૩૪॥

યથા હીનં નભોઽર્કેણ ભૂઃ શૈલૈઃ ખં ચ વાયુના ।

તથા દેશા દિશશ્ચૈવ ગઙ્ગાહીના ન સંશયઃ ॥ ૩૫॥

ત્રિષુ લોકેષુ યે કેચિત્પ્રાણિનઃ સર્વ એવ તે ।
તર્પ્યમાણાઃ પરાં તૃપ્તિં યાન્તિ ગઙ્ગાજલૈઃ શુભૈઃ ॥ ૩૬॥

યસ્તુ સૂર્યેણ નિષ્ટપ્તં ગાઙ્ગેયં પિબતે જલમ્ ।
ગવાં નિર્હારનિર્મુક્તાદ્યાવકાત્તદ્વિશિષ્યતે ॥ ૩૭॥

ઇન્દુવ્રતસહસ્રં તુ ચરેદ્યઃ કાયશોધનમ્ ।
પિબેદ્યશ્ચાપિ ગઙ્ગામ્ભઃ સમૌ સ્યાતાં ન વા સમૌ ॥ ૩૮॥

તિષ્ઠેદ્યુગસહસ્રં તુ પાદેનૈકેન યઃ પુમાન્ ।
માસમેકં તુ ગઙ્ગાયાં સમૌ સ્યાતાં ન વા સમૌ ॥ ૩૯॥

લમ્બેતાવાક્શિરા યસ્તુ યુગાનામયુતં પુમાન્ ।
તિષ્ઠેદ્યથેષ્ટં યશ્ચાપિ ગઙ્ગાયાં સ વિશિષ્યતે ॥ ૪૦॥

અગ્નૌ પ્રાપ્તં પ્રધૂયેત યથા તૂલં દ્વિજોત્તમ ।
તથા ગઙ્ગાવગાઢસ્ય સર્વં પાપં પ્રધૂયતે ॥ ૪૧॥

ભૂતાનામિહ સર્વેષાં દુઃખોપહતચેતસામ્ ।
ગતિમન્વેષમાણાનાં ન ગઙ્ગાસદૃશી ગતિઃ ॥ ૪૨॥

ભવન્તિ નિર્વિષાઃ સર્પા યથા તાર્ક્ષ્યસ્ય દર્શનાત્ ।
ગઙ્ગાયા દર્શનાત્તદ્વત્સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૪૩॥

અપ્રતિષ્ઠાશ્ચ યે કેચિદધર્મશરણાશ્ચ યે ।
તેષાં પ્રતિષ્ઠા ગઙ્ગેહ શરણં શર્મ વર્મ ચ ॥ ૪૪॥

પ્રકૃષ્ટૈરશુભૈર્ગ્રસ્તાનનેકૈઃ પુરુષાધમાન્ ।
પતતો નરકે ગઙ્ગા સંશ્રિતાન્પ્રેત્ય તારયેત્ ॥ ૪૫॥

તે સંવિભક્તા મુનિભિર્નૂનં દેવૈઃ સવાસવૈઃ ।
યેઽભિગચ્છન્તિ સતતં ગઙ્ગામભિગતાં સુરૈઃ ॥ ૪૬॥

વિનયાચારહીનાશ્ચ અશિવાશ્ચ નરાધમાઃ ।
તે ભવન્તિ શિવા વિપ્ર યે વૈ ગઙ્ગાં સમાશ્રિતાઃ ॥ ૪૭॥

યથા સુરાણામમૃતં પિતૃણાં ચ યથા સ્વધા ।
સુધા યથા ચ નાગાનાં તથા ગઙ્ગાજલં નૃણામ્ ॥ ૪૮॥

ઉપાસતે યથા બાલા માતરં ક્ષુધયાર્દિતાઃ ।
શ્રેયસ્કામાસ્તથા ગઙ્ગામુપાસન્તીહ દેહિનઃ ॥ ૪૯॥

સ્વાયમ્ભુવં યથા સ્થાનં સર્વેષાં શ્રેષ્ઠમુચ્યતે ।
સ્નાતાનાં સરિતાં શ્રેષ્ઠા ગઙ્ગા તદ્વદિહોચ્યતે ॥ ૫૦॥

યથોપજીવિનાં ધેનુર્દેવાદીનાં ધરા સ્મૃતા ।
તથોપજીવિનાં ગઙ્ગા સર્વપ્રાણભૃતામિહ ॥ ૫૧॥

દેવાઃ સોમાર્કસંસ્થાનિ યથા સત્રાદિભિર્મખૈઃ ।
અમૃતાન્યુપજીવન્તિ તથા ગઙ્ગાજલં નરાઃ ॥ ૫૨॥

જાહ્નવીપુલિનોત્થાભિઃ સિકતાભિઃ સમુક્ષિતઃ ।
મન્યતે પુરુષોઽઽત્માનં દિવિષ્ઠમિવ શોભિતમ્ ॥ ૫૩॥

જાહ્નવીતીરસમ્ભૂતાં મૃદં મૂર્ધ્ના બિભર્તિ યઃ ।
બિભર્તિ રૂપં સોઽર્કસ્ય તમોનાશાત્સુનિર્મલમ્ ॥ ૫૪॥

ગઙ્ગોર્મિભિરથો દિગ્ધઃ પુરુષં પવનો યદા ।
સ્પૃશતે સોઽપિ પાપ્માનં સદ્ય એવાપમાર્જતિ ॥ ૫૫॥

વ્યસનૈરભિતપ્તસ્ય નરસ્ય વિનશિષ્યતઃ ।
ગઙ્ગાદર્શનજા પ્રીતિર્વ્યસનાન્યપકર્ષતિ ॥ ૫૬॥

હંસારાવૈઃ કોકરવૈ રવૈરન્યૈશ્ચ પક્ષિણામ્ ।
પસ્પર્ધ ગઙ્ગા ગન્ધર્વાન્પુલિનૈશ્ચ શિલોચ્ચયાન્ ॥ ૫૭॥

હંસાદિભિઃ સુબહુભિર્વિવિધૈઃ પક્ષિભિર્વૃતામ્ ।
ગઙ્ગાં ગોકુલસમ્બાધાં દૃષ્ટ્વા સ્વર્ગોઽપિ વિસ્મૃતઃ ॥ ૫૮॥

ન સા પ્રીતિર્દિવિષ્ઠસ્ય સર્વકામાનુપાશ્નતઃ ।
અભવદ્યા પરા પ્રીતિર્ગઙ્ગાયાઃ પુલિને નૃણામ્ ॥ ૫૯॥

વાઙ્મનઃકર્મજૈર્ગ્રસ્તઃ પાપૈરપિ પુમાનિહ ।
વીક્ષ્ય ગઙ્ગાં ભવેત્પૂતસ્તત્ર મે નાસ્તિ સંશયઃ ॥ ૬૦॥

સપ્તાવરાન્સપ્ત પરાન્પિતૃંસ્તેભ્યશ્ચ યે પરે ।
પુમાંસ્તારયતે ગઙ્ગાં વીક્ષ્ય સ્પૃષ્ટ્વાવગાહ્ય ચ ॥ ૬૧॥

શ્રુતાભિલષિતા દૃષ્ટા સ્પૃષ્ટા પીતાવગાહિતા ।
ગઙ્ગા તારયતે નૃણામુભૌ વંશૌ વિશેષતઃ ॥ ૬૨॥

દર્શનાત્સ્પર્શનાત્પાનાત્તથા ગઙ્ગેતિ કીર્તનાત્ ।
પુનાત્યપુણ્યાન્પુરુષાઞ્શતશોઽથ સહસ્રશઃ ॥ ૬૩॥

ય ઇચ્છેત્સફલં જન્મ જીવિતં શ્રુતમેવ ચ ।
સ પિતૄંસ્તર્પયેદ્ગઙ્ગામભિગમ્ય સુરાંસ્તથા ॥ ૬૪॥

ન સુતૈર્ન ચ વિત્તેન કર્મણા ન ચ તત્ફલમ્ ।
પ્રાપ્નુયાત્પુરુષોઽત્યન્તં ગઙ્ગાં પ્રાપ્ય યદાપ્નુયાત્ ॥ ૬૫॥

જાત્યન્ધૈરિહ તુલ્યાસ્તે મૃતૈઃ પઙ્ગુભિરેવ ચ ।
સમર્થા યે ન પશ્યન્તિ ગઙ્ગાં પુણ્યજલાં શિવામ્ ॥ ૬૬॥

ભૂતભવ્યભવિષ્યજ્ઞૈર્મહર્ષિભિરુપસ્થિતામ્ ।
દેવૈઃ સેન્દ્રૈશ્ચ કો ગઙ્ગાં નોપસેવેત માનવઃ ॥ ૬૭॥

વાનપ્રસ્થૈર્ગૃહસ્થૈશ્ચ યતિભિર્બ્રહ્મચારિભિઃ ।
વિદ્યાવદ્ભિઃ શ્રિતાં ગઙ્ગાં પુમાન્કો નામ નાશ્રયેત્ ॥ ૬૮॥

ઉત્ક્રામદ્ભિશ્ચ યઃ પ્રાણૈઃ પ્રયતઃ શિષ્ટસમ્મતઃ ।
ચિન્તયેન્મનસા ગઙ્ગાં સ ગતિં પરમાં લભેત્ ॥ ૬૯॥

ન ભયેભ્યો ભયં તસ્ય ન પાપેભ્યો ન રાજતઃ ।
આ દેહપતનાદ્ગઙ્ગામુપાસ્તે યઃ પુમાનિહ ॥ ૭૦॥

ગગનાદ્યાં મહાપુણ્યાં પતન્તીં વૈ મહેશ્વરઃ ।
દધાર શિરસા દેવીં તામેવ દિવિ સેવતે ॥ ૭૧॥

અલઙ્કૃતાસ્ત્રયો લોકાઃ પથિભિર્વિમલૈસ્ત્રિભિઃ ।
યસ્તુ તસ્યા જલં સેવેત્કૃતકૃત્યઃ પુમાન્ભવેત્ ॥ ૭૨॥

દિવિ જ્યોતિર્યથાદિત્યઃ પિતૄણાં ચૈવ ચન્દ્રમાઃ ।
દેવેશશ્ચ યથા નૄણાં ગઙ્ગેહ સરિતાં તથા ॥ ૭૩॥

માત્રા પિત્રા સુતૈર્દારૈર્વિયુક્તસ્ય ધનેન વા ।
ન ભવેદ્ધિ તથા દુઃખં યથા ગઙ્ગાવિયોગજમ્ ॥ ૭૪॥

નારણ્યૈર્નેષ્ટવિષયૈર્ન સુતૈર્ન ધનાગમૈઃ ।
તથા પ્રસાદો ભવતિ ગઙ્ગાં વીક્ષ્ય યથા નૃણામ્ ॥ ૭૫॥

પૂર્ણમિન્દું યથા દૃષ્ટ્વા નૃણાં દૃષ્ટિઃ પ્રસીદતિ ।

ગઙ્ગાં ત્રિપથગાં દૃષ્ટ્વા તથા દૃષ્ટિઃ પ્રસીદતિ ॥ ૭૬॥

તદ્ભાવસ્તદ્ગતમનાસ્તન્નિષ્ઠસ્તત્પરાયણઃ ।
ગઙ્ગાં યોઽનુગતો ભક્ત્યા સ તસ્યાઃ પ્રિયતાં વ્રજેત્ ॥ ૭૭॥

ભૂઃસ્થૈઃ ખસ્થૈર્દિવિષ્ઠૈશ્ચ ભૂતૈરુચ્ચાવચૈરપિ ।
ગઙ્ગા વિગાહ્યા સતતમેતત્કાર્યતમં સતામ્ ॥ ૭૮॥

ત્રિષુ લોકેષુ પુણ્યત્વાદ્ગઙ્ગાયાઃ પ્રથિતં યશઃ ।
યત્પુત્રાન્સગરસ્યૈષા ભસ્માખ્યાનનયદ્દિવમ્ ॥ ૭૯॥

વાય્વીરિતાભિઃ સુમહાસ્વનાભિર્દ્રુતાભિરત્યર્થસમુચ્છ્રિતાભિઃ ।
ગઙ્ગોર્મિભિર્ભાનુમતીભિરિદ્ધઃ સહસ્રરશ્મિપ્રતિમો વિભાતિ ॥ ૮૦॥

પયસ્વિનીં ઘૃતિનીમત્યુદારાં સમૃદ્ધિનીં વેગિનીં દુર્વિગાહ્યામ્ ।
ગઙ્ગાં ગત્વા યૈઃ શરીરં વિસૃષ્ટં ગતા ધીરાસ્તે વિબુધૈઃ સમત્વમ્ ॥ ૮૧॥

અન્ધાઞ્જડાન્દ્રવ્યહીનાંશ્ચ ગઙ્ગા યશસ્વિની બૃહતી વિશ્વરૂપા ।
દેવૈઃ સેન્દ્રૈર્મુનિભિર્માનવૈશ્ચ નિષેવિતા સર્વકામૈર્યુનક્તિ ॥ ૮૨॥

ઊર્જાવતીં મધુમતીં મહાપુણ્યાં ત્રિવર્ત્મગામ્ ।
ત્રિલોકગોપ્ત્રીં યે ગઙ્ગાં સંશ્રિતાસ્તે દિવં ગતાઃ ॥ ૮૩॥

યો વત્સ્યતિ દ્રક્ષ્યતિ વાપિ મર્ત્ય સ્તસ્મૈ પ્રયચ્છન્તિ સુખાનિ દેવાઃ ।
તદ્ભાવિતાઃ સ્પર્શને દર્શને ય સ્તસ્મૈ દેવા ગતિમિષ્ટાં દિશન્તિ ॥ ૮૪॥

દક્ષાં પૃથ્વીં બૃહતીં વિપ્રકૃષ્ટાં શિવામૃતાં સુરસાં સુપ્રસન્નામ્ ।
વિભાવરીં સર્વભૂતપ્રતિષ્ઠાં ગઙ્ગાં ગતા યે ત્રિદિવં ગતાસ્તે ॥ ૮૫॥

ખ્યાતિર્યસ્યાઃ ખં દિવં ગાં ચ નિત્યં પુરા દિશો વિદિશશ્ચાવતસ્થે ।
તસ્યા જલં સેવ્ય સરિદ્વરાયા મર્ત્યાઃ સર્વે કૃતકૃત્યા ભવન્તિ ॥ ૮૬॥

ઇયં ગઙ્ગેતિ નિયતં પ્રતિષ્ઠા ગુહસ્ય રુક્મસ્ય ચ ગર્ભયોષા ।
પ્રાતસ્ત્રિમાર્ગા ઘૃતવહા વિપાપ્મા ગઙ્ગાવતીર્ણા વિયતો વિશ્વતોયા ॥ ૮૭॥

સુતાવનીધ્રસ્ય હરસ્ય ભાર્યા દિવો ભુવશ્ચાપિ કક્ષ્યાનુરૂપા ।
ભવ્યા પૃથિવ્યા ભાવિની ભાતિ રાજ ન્ગઙ્ગા લોકાનાં પુણ્યદા વૈ ત્રયાણામ્ ॥ ૮૮॥

મધુપ્રવાહા ઘૃતરાગોદ્ધૃતાભિર્મહોર્મિભિઃ શોભિતા બ્રાહ્મણૈશ્ચ ।
દિવશ્ચ્યુતા શિરસાત્તા ભવેન ગઙ્ગાવનીધ્રાસ્ત્રિદિવસ્ય માલા ॥ ૮૯॥

યોનિર્વરિષ્ઠા વિરજા વિતન્વી શુષ્મા ઇરા વારિવહા યશોદા ।
વિશ્વાવતી ચાકૃતિરિષ્ટિરિદ્ધા ગઙ્ગોક્ષિતાનાં ભુવનસ્ય પન્થાઃ ॥ ૯૦॥

ક્ષાન્ત્યા મહ્યા ગોપને ધારણે ચ દીપ્ત્યા કૃશાનોસ્તપનસ્ય ચૈવ ।
તુલ્યા ગઙ્ગા સમ્મતા બ્રાહ્મણાનાં ગુહસ્ય બ્રહ્મણ્યતયા ચ નિત્યમ્ ॥ ૯૧॥

ઋષિષ્ટુતાં વિષ્ણુપદીં પુરાણીં સુપુણ્યતોયાં મનસાપિ લોકે ।
સર્વાત્મના જાહ્નવીં યે પ્રપન્ના સ્તે બ્રહ્મણઃ સદનં સમ્પ્રયાતાઃ ॥ ૯૨॥

લોકાનિમાન્નયતિ યા જનનીવ પુત્રા ન્સર્વાત્મના સર્વગુણોપપન્ના ।
સ્વસ્થાનમિષ્ટમિહ બ્રાહ્મમભીપ્સમાનૈર્ગઙ્ગા સદૈવાત્મવશૈરુપાસ્યા ॥ ૯૩॥

ઉસ્રાં જુષ્ટાં મિષતીં વિશ્વતોયા મિરાં વજ્રીં રેવતીં ભૂધરાણામ્ ।
શિષ્ટાશ્રયામમૃતાં બ્રહ્મકાન્તાં ગઙ્ગાં શ્રયેદાત્મવાન્સિદ્ધિકામઃ ॥ ૯૪॥

પ્રસાદ્ય દેવાન્સવિભૂન્સમસ્તા ન્ભગીરથસ્તપસોગ્રેણ ગઙ્ગામ્ ।
ગામાનયત્તામભિગમ્ય શશ્વ ન્પુમાન્ભયં નેહ નામુત્ર વિદ્યાત્ ॥ ૯૫॥

ઉદાહૃતઃ સર્વથા તે ગુણાનાં મયૈકદેશઃ પ્રસમીક્ષ્ય બુદ્ધ્યા ।
શક્તિર્ન મે કાચિદિહાસ્તિ વક્તું ગુણાન્સર્વાન્પરિમાતું તથૈવ ॥ ૯૬॥

મેરોઃ સમુદ્રસ્ય ચ સર્વરત્નૈઃ સઙ્ખ્યોપલાનામુદકસ્ય વાપિ ।
વક્તું શક્યં નેહ ગઙ્ગાજલાનાં ગુણાખ્યાનં પરિમાતું તથૈવ ॥ ૯૭॥

તસ્માદિમાન્પરયા શ્રદ્ધયોક્તા ન્ગુણાન્સર્વાઞ્જાહ્નવીજાંસ્તથૈવ ।
ભજેદ્વાચા મનસા કર્મણા ચ ભક્ત્યા યુક્તઃ પરયા શ્રદ્દધાનઃ ॥ ૯૮॥

લોકાનિમાંસ્ત્રીન્યશસા વિતત્ય સિદ્ધિં પ્રાપ્ય મહતીં તાં દુરાપામ્ ।
ગઙ્ગાકૃતાનચિરેણૈવ લોકા ન્યથેષ્ટમિષ્ટાન્વિચરિષ્યસિ ત્વમ્ ॥ ૯૯॥

તવ મમ ચ ગુણૈર્મહાનુભાવા જુષતુ મતિં સતતં સ્વધર્મયુક્તૈઃ ।
અભિગતજનવત્સલા હિ ગઙ્ગા ભજતિ યુનક્તિ સુખૈશ્ચ ભક્તિમન્તમ્ ॥ ૧૦૦॥

ઇતિ મહાભારતે અનુશાસનપર્વણિ ૨૭ અધ્યાયાન્તર્ગતં
સિદ્ધકૃતં ગઙ્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । અનુશાસનપર્વ । અધ્યાય ૨૭/૨૫-૯૮॥

mahAbhArata . anushAsanaparva . adhyAya 27/25-98..

Proofread by PSA Easwaran

*Siddhakritam Ganga Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*